तल्लग्नस्य स्थूलमानम्। ३। ४७। इति ज्योतिस्तत्त्वम्। *। त्रितारकशराकृतिश्रवणानक्षत्रस्य गगनमध्योदये मेषलग्नस्य अष्टादशपलाधिकदण्डैको गतो भवेत्। यथा,—

"तारकात्रयमिते शराकृतौ
केशवे गगनमध्यवर्त्तिनि।
मत्तवारणगतेऽजलग्नतो
निर्ययुर्गजमहीधलिप्तिका:।"

मर्द्दलाकृतिपञ्चतारकधनिष्ठानक्षत्रस्य मस्तकोपर्य्युदये मेषलग्नस्य षट्त्रिंशत्पलाधिकदण्डद्वयं गतं स्यात्। यथा,—

"मस्तकोपरि समागते धने
मर्द्दलाकृतिनि पञ्चतारके।
यान्ति कान्तिमति मेषलग्नत:
सारसाक्षि रसपक्षलिप्तिका:।"

इति कालिदासकृतरात्रिलग्ननिरूपणम्।

मेषक:, पुं, (मिषतीति। मिष्+अच्। संज्ञायां कन्।) जीवशाक:। राजनिर्घण्ट:।

मेषकम्बल:, पुं, (मेषलोमनिर्म्मित: कम्बल:। मध्यपदलोपी कर्म्मधारय:।) मेषलोमनिर्म्मितवस्त्रम्। तत्पर्य्याय:। ऊर्णायु: २। इत्यमर:। २। ६। १०७॥

मेषलोचन:, पुं, (मेषस्य लोचनमिव पुष्पमस्य।) चक्रमर्द्द:। इति भावप्रकाश:॥ मेषचक्षुस्तुल्यचक्षुषि, त्रि॥

मेषवल्ली, स्त्री, (मेषप्रिया वल्ली।) अजशृङ्गी। इति भावप्रकाश:॥

मेषविषाणिका, स्त्री, (मेषस्य विषाणं शृङ्गमिव प्रतिकृतिरस्या:। विषाण+प्रतिकृतौ कन्। टापि अत इत्वम्।) मेषशृङ्गी। इति रत्नमाला॥

मेषशृङ्ग:, पुं, (मेषस्य शृङ्गमिव। तदाकृतित्वात्।) स्थावरविषभेद:। इति हेमचन्द्र:। ४। २६३॥ (यथा, सुश्रुते उत्तरतन्त्रे। १७ अध्याये।
"मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि।")

मेषशृङ्गी, स्त्री, (मेषशृङ्ग+गौरादित्वात् ङीष्।) अजशृङ्गीवृक्ष:। मेढ़ाशृङ्गी इति भाषा। (यथा, सुश्रुत। १। ३९।
"मेषशृङ्गी मातुलुङ्गी सुरङ्गीत्यादि।")
तत्पर्य्याय:। वन्दीवृक्ष: २ मेषविषाणिका ३ चक्षु: ४ चक्षुर्व्वहनम् ५ मेढ़्रशृङ्गी ६ महद्गुमा ७। इति रत्नमाला। (तथास्या: पर्य्यायो गुणाश्च।

"मेषशृङ्गी विषाणी स्यान्मेषवल्ल्यजशृङ्गिका।
मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत्।
रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माक्षिशूलशुत्।
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत्।
दीपनं स्रंसनं कासकृमिव्रणविषापहम्।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)

मेषा, स्त्री, (मिष्यतेऽसौ। मिष्+कर्म्मणि घञ्। टाप्।) त्रुटि:। इति शब्दचन्द्रिका। गुजराटी एलाइच इति भाषा॥

मेषाक्षिकुसुम:, पुं, (मेषाणां अक्षिवत् कुसुमान्यस्य।) चक्रमर्द्द:। इति रत्नमाला॥

मेषाण्ड:, पुं, (मेषस्याण्डमिवाण्डमस्य।) इन्द्र:। इति पुराणम्॥

मेषान्त्री, स्त्री, (मेषस्य अन्त्रमिव अन्त्रं सूक्ष्मलतास्या:।) वस्तान्त्रीवृक्ष:। इति राजनिर्घण्ट:॥

मेषालु:, पुं, (मेषप्रिय: आलु:।) वर्व्वरावृक्ष:। इति शब्दचन्द्रिका॥

मेषाह्वय:, पुं, (मेषस्याह्वय: आह्वास्य।) चक्रमर्द्द:। इति राजनिर्घण्ट:॥ (विवरणमस्य चक्रमर्द्दशब्दे ज्ञातव्यम्॥)

मेषिका, स्त्री, (मेषी+स्वार्थे कन्। टाप्। ह्रस्व:।) मेषी। इति शब्दरत्नावली॥

मेषी, स्त्री, (मिष्यते गृह्यते असौ इति। मिष+घञ्। ङीष्।) तिनिशवृक्ष:। जटामांसी। इति राजनिर्घण्ट:॥ मेषस्त्रीजाति:। भेड़ी। (यथा, वाजसनेयसंहितायाम्। ३। ५९।
"भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजं सुखं मेषाय मेष्यै।")
तत्पर्य्याय:। जालकिनी २ अवि: ३। इति त्रिकाण्डशेष:॥ एड़का ४ मेषिका ५ इति शब्दरत्नावली। कुररी ६ रुजा ७ अविला ८ वेणी ९। इति हेमचन्द्र:। ४। ३४२। अस्या दुग्धगुणा:। मधुरत्वम्। गाढ़त्वम्। स्निग्धत्वम्। कफापहत्वम्। वातामयकरत्वम्। स्थौल्यत्वम्। लोमशायाश्चेत् गुरुत्वम्। वृद्धिदत्वञ्च। इति राजनिर्घण्ट:॥*॥ अपि च।

"आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत्
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्।
गुरुकासेऽनिलोद्भूते केवले चानिले वरम्।"

इति भावप्रकाश:॥

अस्या दधिगुणा:। सुस्निग्धत्वम्। कफपित्तकरत्वम्। गुरुत्वम्। वाते रक्तवाते च पथ्यत्वम्। शोफव्रणनाशित्वञ्च॥*॥ अस्या नवनीतगुणा:। क्लिष्टगन्धत्वम्। शीतलत्वम्। मेधाहरत्वम्। पुष्टिदत्वम्। स्थौल्यत्वम्। मन्दाग्निदीपनत्वम्। सारकत्वम्। पाके हिमत्वम्। लघुत्वम्। योनिशूले कफे वाते दुर्नाम्नि च हितत्वञ्च। दुर्नाम्नि स्थाने गुदशूले इति पुस्तकान्तरे पाठ:॥*॥ तस्या घृतगुणा:। अतीवगौरवात् सुकुमारदेहिनां वर्ज्यत्वम्। बुद्धिपाटवहरत्वम्। बलावहत्वम्। वपुषां विरुगन्धिकारित्वञ्च। इति राजनिर्घण्ट:॥ तन्मांसगुणा:। यथा, भावप्रकाशे।

"छागमेषवृषाश्वाद्या: ग्राम्या: प्रोक्ता महर्षिभि:।
ग्राम्या वातहरा: सर्व्वे दीपना: कफपित्तला:।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धना:॥"

मेषूरणं, क्ली, दशमलग्नम्। यथा,—

"कर्म्मस्थानञ्च दशमं खं मेषूरणमास्पदम्।"

इति ज्योतिस्तत्त्वम्॥

मेह:, पुं, (मेहति क्षरति शुक्रादिरनेनेति। मिह्+घञ्।) प्रमेहरोग:। इत्यमर:। २।६।५६॥ (अस्यौषधं यथा,—

"वङ्गभस्म हि षक्लञ्च लेहयेन्मधुना सह।
ततो गुड़समं गन्धं भक्षयेत् कर्षमात्रकम्॥
गुड़ूचीसत्त्वमथवा शर्करासहितन्तथा।
सर्व्वमेहहरो श्रेयो वङ्गावलेह उत्तम:॥"

इति वङ्गावलेह:॥

"भस्मसूतं समं कान्तमभ्रकन्तु शिलाजतु।
शुद्धताप्यं शिलाव्योषं त्रिफलाङ्कोठजीरकम्॥
कार्पासमज्जारजनी समं भाव्यञ्च भृङ्गिणा।
विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा॥
माषमात्रं हरेन्मेहं मेघनादरसो महान्॥"

इति मेघनादरस:॥

"रसभस्म समायुक्तं वङ्गभस्म प्रकल्पयेत्।
अस्य माषद्वयं हन्ति मेहान् चौद्रसमन्वितम्॥"

इति वङ्गेश्वररस:॥

इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे। अन्यत् प्रमेहशब्दे द्रष्टव्यम्॥*॥ मिहतीति। मिह+अच्।) मेष:। इति शब्दचन्द्रिका॥ प्रस्राव:। इति हेमचन्द्र:। ३।२९७॥ (अग्न्यादभिमुखं तत्करणे दोषो यथा, मनौ। ४।५२।

"प्रत्यग्निं प्रतिसूर्य्यञ्च प्रतिसोमोदकद्विजान्।
प्रतिगां प्रतिवातञ्च प्रज्ञा नश्यति मेहत:॥"

"अग्निसूर्य्यचन्द्रजलब्राह्मणगोवाताभिमुखं मूत्रपुरीषे कुर्व्वत: प्रज्ञा नश्यति।" इति तट्टीकायां कुल्लूकभट्ट:॥)

मेहघ्नी, स्त्री, (मेहं हन्तीति। हन्+टक्। ङीष्।) हरिद्रा। इति रत्नमाला॥

मेहनं, क्ली, (मेहति सिञ्चति मूत्ररेतसीति। मिह् सेचने+ल्युट्।) शिश्न:। इत्यमर:। २।६।७६॥ (यथा, ऋग्वेदे। १०। १६३। ५।
"मेहनाद्वनं करणाल्लोम।"
"मेहनात् मेढ्रात्।" इति तद्भाष्ये सायण:॥ यथा, च सुश्रुते। १। ३५।

"ह्रस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनम्।
तथोरस्यवलीढ़ानि न च स्यात् पृष्ठमायतम्॥
ऊर्द्ध्वञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिण:।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते।
प्रेक्षते यश्च विभ्रान्तं स जीवेत् पञ्चविंशतिम्॥")

मूत्रम्। इति मेदिनी। ने, ११०॥ (यथा, सुश्रुते। १। ३२।

"वस्तवद्विलपन् यश्च भूमौ पतति स्रस्तमुष्कस्तब्धमेढ्रो भग्नग्रीव: प्रनष्टमेहनश्च मनुष्य:॥")

भावेऽनट् प्रत्यये मूत्रोत्सर्गश्च॥

मेहन:, पुं, (मेहति सिञ्चति रसमिति। मिह+ल्यु:।) मुष्ककवृक्ष:। इति राजनिर्घण्ट:॥

मेहना, स्त्री, (मेह्यते चार्य्यते शुक्रमस्यामिति। मिह क्षरणे+णिच्+अधिकरणे युच्। स्त्रियां टाप्।) महिला। इति केचित्॥ (मेहनीयम्। यथा, ऋग्वेदे। ५। ३९। १।
"यदिन्द्र चित्रमेहनास्ति त्वादातमद्रिव:॥")